श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनचत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनचत्वारिंशं दशकम् ॥

## योगमायानयनादिवर्णनम्

भवन्तमयमुद्वहन् यदुकुलोद्वहो निस्सरन्
दददर्श गगनोच्चलज्जलभरां कलिन्दात्मजाम्।
अहो सलिलसञ्चयः स पुनरैन्द्रजालोदितो
जलौघ इव तत्क्षणात् प्रपदमेयतामाययौ ॥ 39.1 ॥

प्रसुप्तपशुपालिकां निभृतमारुदद्बालिका -
मपावृतकवाटिकां पशुपवाटिकामाविशन्।
भवन्तमयमर्पयन् प्रसवतल्पके तत्पदा -
द्वहन् कपटकन्यकां स्वपुरमागतो वेगतः ॥ 39.2 ॥

ततस्त्वदनुजारवक्षपितनिद्रवेगद्रवद् -
भटोत्करनिवेदितप्रसववार्तयैवार्तिमान्।
विमुक्तचिकुरोत्करस्त्वरितमापतन् भोजरा -
डतुष्ट इव दृष्टवान् भगिनिकाकरे कन्यकाम् ॥ 39.3 ॥

ध्रुवं कपटशालिनो मधुहरस्य माया भवे -
दसाविति किशोरिकां भगिनिकाकरालिङ्गिताम्।
द्विपो नलिनिकान्तरादिव मृणालिकामाक्षिप -
न्नयं त्वदनुजामजामुपलपट्टके पिष्टवान् ॥ 39.4 ॥

ततो भवदुपासको झटिति मृत्युपाशादिव
प्रमुच्य तरसैव सा समधिरूढरूपान्तरा।

अधस्तलमजग्मुषी विकसदष्टबाहुस्फुर -
    न्महायुधमहो गता किल विहायसा दिद्युते ॥ **39.5** ॥

नृशंसतर कंस ते किमु मया विनिष्पिष्टया
    बभूव भवदन्तकः क्वचन चिन्त्यतां ते हितम्।
इति त्वदनुजा विभो खलमुदीर्य तं जग्मुषी
    मरुद्गणपणायिता भुवि च मन्दिराण्येयुषी ॥ **39.6** ॥

प्रगे पुनरगात्मजावचनमीरिता भूभुजा
    प्रलम्बबकपूतनाप्रमुखदानवा मानिनः।
भवन्निधनकाम्यया जगति बभ्रमुर्निर्भयाः
    कुमारकविमारकाः किमिव दुष्करं निष्कृपैः ॥ **39.7** ॥

ततः पशुपमन्दिरे त्वयि मुकुन्द नन्दप्रिया -
    प्रसूतिशयनेशये रुदति किञ्चिदञ्चत्पदे।
विबुध्य वनिताजनैस्तनयसम्भवे घोषिते
    मुदा किमु वदाम्यहो सकलमाकुलं गोकुलम् ॥ **39.8** ॥

अहो खलु यशोदया नवकलायचेतोहरं
    भवन्तमलमन्तिके प्रथममापिबन्त्या दृशा।
पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा
    मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः ॥ **39.9** ॥

भवत्कुशलकाम्यया स खलु नन्दगोपस्तदा
    प्रमोदभरसङ्कुलो द्विजकुलाय किन्नाददात्।
तथैव पशुपालकाः किमु न मङ्गलं तेनिरे
    जगत्त्रितयमङ्गल त्वमिह पाहि मामामयात् ॥ **39.10** ॥

॥ इति श्रीमन्नारायणीये एकोनचत्वारिंशं दशकं समाप्तम् ॥